# Role of Schools in Advancing Global Profile of Sanskrit

17th July 2017

**संस्कृतं वन्दते नित्यं, संस्कृतं  भाषते सदा ।**
**संस्कृतं भारतमेतद्, सर्वं संस्कृतमयं जगत् ।।**
**पठामि संस्कृतं नित्यं, वदामि संस्कृतं सदा ।**
**ध्यायामि संस्कृतं सम्यक्, वन्दे संस्कृतमातरम् ।।**

सर्वेभ्य: नमो नम: ! अद्य अहम् आत्मानं धन्यं मन्ये यत् उक्त-विषयम् अवलम्ब्य आयोजितायां सङ्गोष्ठ्यां भवतांपुरतः किञ्चिद् वक्तुम् उत्सुकोऽस्मि । अत्र संस्कृतभाषायां श्रद्धावन्तः सर्वेऽपि समुपस्थिताः विद्यन्ते । अत्र उपस्थिता: संस्कृतस्य विद्वांस:, विभिन्न-विद्यालयेभ्यः समागताः प्रधानाचार्या:, शिक्षकाश्च सर्वे गणमान्या: संस्कृतस्य महत्त्वं जानन्ति ।

२. यथा भोजनेन अस्माकं शरीरस्य पोषणं भवति, तथैव अस्माकं व्यक्तित्वं विचारैश्च निर्मीयते। विचाराणां श्रेष्ठतायै, गम्भीरतायै व्यापकतायै च भाषा अनिवार्या भवति । भाषया बिना चिन्तनं भाषणं पठनं लेखनं वा किमपि न सम्भवति । संस्कृतम् आदिकालादेव व्यवहारिकी वैचारिकी च भाषा अस्ति । एतस्यां ज्ञान-विज्ञानस्य समृद्ध-कोषः विद्यते । संस्कृते विद्यमानं ज्ञानं विज्ञानञ्च प्राप्तुं संस्कृतभाषयाः सम्यक् ज्ञानम् आवश्यकम् वर्तते । सामाजिक-व्यवहाराय आजीविकायै च विभिन्न-विषयाणाम् अध्ययनम् आवश्यकम् भवति । किन्तु पारिवारिक- सामाजिक-

व्यक्तिगत-निर्णयेभ्यः विचाराणाम् आवश्यकता अनुभूयते; ये विचारा: अस्माभिः संस्कृतभाषया प्राप्तुं शक्यन्ते ।

३. संस्कृतभाषा भारतवर्षस्य शास्त्रीयभाषा वर्तते । इयं देव वाणी, गीर्वाणवाणी सुरभारती वा इत्यपि कथ्यते -

**भाषासु मधुरा मुख्या दिव्या गीर्वाण भारती ।**
**तस्यां हि काव्यं मधुरमं तस्मादपि सुभाषितम् ।।**

एषा न केवलं अस्माकं देशस्य अपितु विश्वस्य प्राचीनतमा भाषा विद्यते । संस्कृतं सर्वासाम् भारतीय-भाषाणां जननीम् अस्ति, इति मन्यते । अस्य कारणम् अस्ति अस्याः भाषायाः शुद्धता समृद्धता श्च । फ़ोर्ब्स पत्रिकायां जुलाई सप्ता-शीत्यधिक-नवदश-शततमे वर्षे प्रकाशितं विवरणानुसारम् संस्कृतं सङ्गणकार्य-हेतवे सर्वाधिका उपयुक्ता भाषा मन्यते । संस्कृतभाषा मनुष्याणां इदं जगत्याम् सर्वाणि वस्तूनि त्यक्तेन भुजीथ इति शिक्षां प्रददाति । यथा **ईषावास्योपनिषदि** कथिततम् :

**ईशावास्यमिदं सर्वं यद्किंचिद् जगत्यां जगत् ।**
**तेन त्यक्तेन भुंजीथ मा गृधा कस्यविद् धनम् ।।**

उक्त उपनिषद् वाक्यानि सर्वदा प्रेरयन्ति । यत्र नारीणां समादरणाय, परेषां कल्याणाय, सर्वजनहिताय, सर्वजनसुखाय शिक्षां दीयते, सा संस्कृतभाषा निश्चयेन व्यवहारे भवितव्या ।

४. देववाण्याः इतिहासः चिरकालीनः वर्तते । अधुनापि मानव-सभ्यतायाः सर्वाधिकपुरातनः संस्कृतग्रन्थः ऋग्वेदः इति । ऋग्वेदस्य रचना ईसातः पंचसहस्त्र-वर्षपूर्वतनी वर्तते । नवदश्यां शताब्दौ सुप्रसिद्ध वैज्ञानिक: थॉमस एल्वा एडिसन महोदय: 'ग्रामोफोन' उपकरणस्य आविष्कारं कृतवान् । किं भवद्भिः ज्ञायते यत् ग्रामोफोन-यन्त्रे सर्वप्रथमं ध्वनिमुद्रणं कस्यां भाषायाम् अभवत् ? एडिसन स्वग्रामोफोनयन्त्रं स्वीकृत्य इंग्लैण्डदेशम् अगच्छत् । तत्र सः सुप्रसिद्ध जर्मनभाषा-विद् प्रोफ़ेसर मैक्समूलर सह मिलितवान् कथितवान् च "अहं भवतः ध्वन्यांकनं कर्तुम् इच्छामि।" सः हसन् ध्वनिमुद्रणम् अकरोत् । सायंकाले आयोजितुं जनसभायां ग्रामोफोन-यन्त्रेण कृतस्य ध्वनिमुद्रणस्य प्रथमं ध्वनिं श्रोतुम् बहुविद्वाना: आगता: । एडिसनवर्यः यदा ग्रामोफोन-यन्त्रं चालितवान् तदा सर्वे विद्वाना: आश्चर्यचकिताः अभवन् । यतः प्रथम-ध्वनिमुद्रणे या भाषा आसीत् सा पूर्वं केनापि न श्रुतवान् । न इयम् आङ्ग्लभाषा आसीत् नैव ग्रीक, लेटिन वा । इयं संस्कृतभाषा आसीत् । एडिसनवर्यस्य ग्रामफोन-यन्त्रे ध्वनिमुद्रिता प्रथम-भाषा रूपेण मैक्समूलरवर्यः ऋग्वेदस्य अग्निसूक्तस्य प्रथमां ऋचाम् **"ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्न धातमम्"** इति उच्चारयत् । अस्माभिः तादृशस्य अग्निदेवस्य स्तुतिः क्रियते यः यज्ञस्य पुरोहितः, देवः, ऋत्विक्: , होता वर्तते । अपि च येन याजकाः यज्ञलाभैः विभूष्यन्ते ।

५. संस्कृतभाषा अपि उपयोगितायाः व्यवहार-अल्पत्वात् च समाप्ता इति मन्यते; एतत् कथनम् अप्रामाणिकम् अस्ति । संस्कृतभाषा उपयोगितायाः अभावत्वात् न नष्टा जाता अपितु अस्माभिः संकीर्ण मानसिकता स्वार्थकारणाच्च नाशिता । यदा या कापि भाषा आजीविकां प्रतिष्ठाञ्च दापयितुम् असमर्था भवति तदा समाजे स्वाभाविक-रूपेण तस्याः अध्ययनम्

अध्यापनञ्च न्यूनतां गच्छति । विगत-शताब्दीभ्यः संस्कृतेन सह तदेव जायमानम् । या भाषा जीवनवृत्तिं सम्मानञ्च दापयितुम् असमर्था भवति तां कः पठति ? जर्मन्, जैपनीज्, फ्रैञ्च्, चीनी, हिब्रू भाषां च बहूनिजनाः पठन्ति । एताः आजीविकापरक-भाषाः सन्ति ।

६. संस्कृत भाषायां प्रति युवानः केवलं तदर्थम् एव आकृष्टाः न भविष्यन्ति यत् संस्कृते रामायणम् , महाभारतम्, भगवदगीता, उपनिषदाश्च निगदितम् । धार्मिककार्यक्रमेषु कृतः मन्त्रोच्चारः तान् संस्कृतं पठितुं न प्रेरयिष्यति । संस्कृतं प्रति युवानः तदैव आकृष्टाः भविष्यन्ति यदा एषा भाषा इतिहासस्य न अपितु भविष्यत: भाषा भविष्यति । अनेका: पश्चिम-विद्वांसः मन्यन्ते यत् संस्कृतभाषा सङ्गणकार्य-हेतवे सर्वाधिका उपयुक्ता । परं तु भारतवर्षे कोऽपि एतत् सम्बद्धम् अनुसन्धानम् अद्यावधिः अपि न करोति । एमिस-अनुसन्धानकेन्द्रं कैलिफोर्निया इत्यस्य वैज्ञानिक: **रिक ब्रिग्गसः** एकस्मिन् शोधलेखे **"संस्कृत एंड आर्टिफिशयल इंटेलीजेंस-नासा"** इत्यत्र अकथयत् यत् संस्कृतं वयं यान्त्रिकी-भाषारूपेण प्रयोक्तुं शक्नुमः यतः संस्कृतस्य वाक्येषु शब्दानां निश्चितक्रमस्य बाध्यता नास्ति । प्रत्येकं पदं पूर्णं, स्पष्टं सन्देहरहितं च अस्ति । संस्कृतवाक्येषु पदानि केनापि क्रमेण स्थापयितुं शक्यन्ते , अत्र अनर्थस्य सम्भावना न वर्तते । एतत् एतदर्थं सम्भवति यतः प्रत्येकं पदं प्रकृति-प्रत्यय-विभक्ति-वचनानुगुणं भवति अतः क्रमपरिवर्तनेन अपि तस्य अर्थः सुरक्षितः । यथा - **"अहं गृहं गच्छामि अथवा गच्छामि गृहम् अहम् "** अत्र उभयोः वाक्ययोः अर्थस्तु समानः ।

७. संस्कृतकारणात् एव अस्माकं देशे शंकराचार्य-विवेकानन्द - सदृशाः विश्ववन्द्याः विद्वांसः जाताः । अथर्ववेदोक्तं इदं सूक्तं अद्यैव अपि विश्वबंधुत्व-भावनाया: वर्धनार्थम् सर्वाधिकम् उपयुक्तम् मन्यते :

**अयं निज: परोवेति गणना लघुचेतसाम् ।**
**उदारचरितानां तु वसुंधैव कुटुम्बकम् ।।**

विज्ञानक्षेत्रे को न जानाति सुश्रुतस्य , चरकस्य, वराहमिहिरस्य, आर्यभट्टस्य च योगदानम् ? सुश्रुतः तु **सुनम्य-शल्य-चिकित्सा** (प्लास्टिक-सर्जरी) इत्यस्य पिता मन्यते । एतानि तथ्यानि तु अस्मद् अपेक्षया मैक्समूलर-सरविलियमजोंस-सदृशाः पाश्चात्यविद्वांसः जानन्ति । यैः संस्कृतस्य महत्त्वं जगतः पुरतः प्रकाशितम् । इदानीम् अपि समये वयं मनसा परतन्त्राः वर्तन्ते ; अतएव पाश्चात्याः सत्यम् असत्यं यत् किंचिदपि वदन्ति तदेव वयं सत्यमपि मन्यन्ते । वयं तु एतद् अपि अंगीकृतवन्तः यत् आर्याः पश्चिमतः **सप्तसैन्धव प्रदेशे** (भारतवर्षे) पुरातनकाले आगताः । परन्तु धन्यवादार्हाः ते वैज्ञानिका: ये जैवविज्ञाने ‘जीन्स’ इति आधारेण प्रमाणितवन्तः यत् आर्याः बहि: कुतश्चिद् अपि न आगताः अपितु ते भारतवर्षस्य एव मूलनिवासिनः आसन् ।

**Will Durant, Late American Historian:** “It is true that even across the Himalayan barrier India has sent to the west, such gifts as grammar and logic, philosophy and fables, hypnotism and chess, and above all numerical and the decimal system. India will teach us the tolerance and gentleness of mature mind, understanding spirit and a unifying, pacifying love for all human beings. India is the motherland of our human race and Sanskrit is the mother of all Indo-European languages. She is the mother of our philosophy, of our mathematics, mother of ideals embodied in Christianity and mother of our democracy. Mother India is in many ways the mother of us all."

**Sir William Jones, British Orientalist:** "The Sanskrit language, whatever be its antiquity is of wonderful structure, more perfect than the Greek, more copious than the Latin and more exquisitely refined than either."

८. भारतवर्षे संस्कृतभाषायां पुराकाले विविधविषयाणां ज्ञानसृजनं कृतम् । तत् ज्ञानम् अधुना अपि उपलब्धम् । भूविज्ञानं, मनोविज्ञानं, दर्शनशास्त्रं, सामाजिकव्यवहारः इत्यादि-विषयेषु उपलब्ध-ज्ञानस्य मान्यता तदर्थं नास्ति यतः वयं भारती याः तस्य विषये न जानीमः । अस्माभिः संस्कृतं प्रति दृष्टिकोणः विचाराश्च परिवर्तनीया ।

९. संस्कृतस्य उन्नत्यै संवर्धनाय च मम केचन परामर्शाः सन्ति । तान् यदि व्यवहारे आनयेम तर्हि संस्कृतस्य प्रचारे, प्रसारे च सहकारः भविष्यति -

संस्कृतशिक्षकाः स्व-शिक्षणं रुचिकरं कुर्युः, पाठने च जीवनोपयोगि-विषयाणां समावेशं कुर्युः ।

संस्कृतं संस्कृतमाध्यमेन एव पाठयेयुः । आवश्यकतानुसारेण हिन्दीभाषायाः प्रयोगः वांछनीय: । आंग्ल-प्रयोगं कदापि न कुर्युः । संस्कृत शिक्षणे पाठ्येतर-गतिविधयः अपि स्युः । शिक्षकस्य भाषा सरला स्यात् । अन्वयस्य आधारेण पाठनीयम् ।

संस्कृतसाहित्ये विज्ञानं, वाणिज्यम् गणितादीनां विषयाणां सम्बद्धः उल्लेखः प्रचुरमात्रायाम् विद्यते । सम्बद्ध-विषय-शिक्षकेण सह तत्सम्बद्ध-चर्चा स्यात् येन सोऽपि स्वपाठने तस्य समावेशं कर्तुं शक्नुयात् ।

यत् संस्कृतशिक्षकाः गर्वम् अनुभवेयुः यत् ते तादृश्याः भाषायाः शिक्षकाः सन्ति  या अतिसमृद्धा । संस्कृतशिक्षकाणां हस्ते ज्ञानकोषस्य कुञ्चिका अस्ति । यस्य परिचयः जगतः पुरतः स्थापयितुं संस्कृतशिक्षकाः एव समर्थाः सन्ति ।  यदा संस्कृतशिक्षकाः संस्कृताभिमानिनः भविष्यन्ति तदैव भवतां छात्राः संस्कृतं प्रति श्रद्धावन्तः रुचिमन्तः च भविष्यन्ति ।

१०.  केन्द्रिय-माध्यमिक-शिक्षा-परिषद् संस्कृतशिक्षकाणां प्रशिक्षणाय व्यापक-कार्ययोजनां करोति । अस्मिन् प्रशिक्षणे संस्कृतं सरलं सुगम्यञ्च यथा भवति तथा प्रयत्नः भवति । श्रवण-वाचन-कौशलवर्धनाय केन्द्रिय-माध्यमिक-शिक्षा-परिषदा नूतन-मूल्यांकनपद्धतौ संस्कृतेन अपि श्रवण-वाचनकौशलस्य मूल्यांकनम् अपि भवतु इति निश्चितम् । अयं संस्कृतसंवर्धनाय एकः प्रयासः । परिषद् सम्बद्ध-विद्यालयानां सर्वे संस्कृतशिक्षकाः परस्परं मिलित्वा विचाराणां विशिष्ट-शिक्षणपद्धतीनाञ्च परस्परं सम्भाजनं कर्तुं यथा शक्नुयुः तदर्थम् अपि केन्द्रिय-माध्यमिक-शिक्षा-परिषद् प्रयासरता  वर्तते ।

११.  संस्कृतसाहित्यस्य उपेक्षाकारणात् ज्ञानविज्ञानस्य महती सम्पदा नष्टा जाता । संस्कृतभाषायै या च सम्पदा अवशिष्टा वर्तते सा सम्पूर्ण-विश्वसाहित्ये अतुल्या अस्ति । अतः वर्तमानकाले अस्याः भाषाया: रक्षणाय, सम्पादनाय, प्रकाशनाय च अति-आवश्यकता वर्तते । आयान्तु ! वयं मिलित्वा संस्कृतस्य संरक्षणाय संवर्धनाय च सहकारं कुर्मः ।  यतोहि उक्तञ्च -

**जानाति विविधा-भाषाः  जानाति विविधाः कलाः ।**
**आत्मानं नैव जानाति   यो न जानाति  संस्कृतम् ।।  इति**